**शरेष्ट** पु० शृणाति कामिनं शॄ–अच् शरः कामः तस्य इष्ट इष–क्त। आम्रे जटा०।

**शर्करक** पु० शर्करायाः रसः अण् बहुभावः शर्करः रस इव कायति मधुरत्वात् कै–क। मधुरजम्बीरे राजनि०।

**शर्करजा** स्त्री शर्करात् जायते जन–ड। सिताखण्डे राजनि०

**शर्करा** स्त्री शॄ–करन् कस्य नेत्त्वम्। १खण्डविकारे (चिनि) अमरः। २उपलखण्डे ३कर्परखण्डे च (खापरा) मेदि०। शर्कराः सन्त्यस्य मतुप् तस्य लुक्। ४बहुशर्करायुते देशे अमरः। ५रोगभेदे अश्मरीशब्दे ४९५ पृ० दृश्यम्। ६शकले च मेदि०। शर्कराभेद गुणा राजनि० उक्ता यथा "स्निग्धा पाण्डुकशर्करा हितकरी क्षीणे क्षयेऽरोचके चक्षुष्या बलवर्द्धनी सुमधुरा हृद्या च वंशेक्षुजा। वृष्या तृप्तिबलप्रदा श्रमहरा श्यामेक्षुजा शीतला स्निग्धा कान्तिकरीरसालजनिता रक्तेक्षुजा पित्तजित्" "यावनाली हिमोत्पन्ना हिमाली हिमशर्करा। क्षुद्रशर्करिका क्षुद्रा गुड़जा जलबिन्दुजा। हिमजा शर्करा गौल्या शीता तिक्ताऽतिपिच्छला। वातघ्नी सारिका हृद्या दाहपित्तास्रदायिनी। "शीतलान्याकर्करजा माध्वी च मधुशर्करा। माक्षिका शर्करा प्रोक्ता सिताखण्डस्य खण्डकः। सिताखण्डोऽतिमधुरश्चक्षुष्यश्छर्दिनाशनः। कुष्ठव्रणकफश्वासहिक्कापित्तास्रदोषनुत्। यवासशर्करा त्वन्या सुधामोदकमोदकः। तवराजः खण्डसारः खण्डजा खण्डमोदकः"। "मत्स्यण्डिकाः खण्डसिता गुणश्रेष्ठा यथोत्तरम्। विमलाः शीतलाः स्निग्धाः गुर्व्यः स्वादुतराः सराः। वृष्याश्चाघात क्षीणरक्तपित्तानिलापहाः। मत्स्यण्डी पाचिनी बल्या कषाया वातजित् गुरुः। खण्डं गुरु सरं वृष्यं वातघ्नं बलपुष्टिदम्। सितोपला सरा गुर्वी वातघ्नी न कफप्रदा"। पथ्यापथ्यविवेकः "शर्करा ज्वरपित्तास्रतृड्मूर्च्छाच्छर्दितृषापहा। तृष्णाम्लज्वराजस्तु ज्वरदाहास्रपित्तनुत्। यसिका फाणितगुड़खण्डमत्स्यण्डिकासिताः। निर्मला लघवो ज्ञेयाः शीतवीर्या यथोत्तरम्। यथा यथैषां वैमल्यं भवेच्छैत्यं तथा तथा" राजवल्लभः। "खण्डन्तु सिकताकृपं सुश्वेतं शर्करा सिता। सिता सुमधुरा रुच्या वातपित्तास्रदाहजित्। मूर्च्छाच्छर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी। भवेन्मधुसिता शीता रक्तपित्तहरी गुरुः। छर्द्यतीसारतृड्दाहरक्तजित्तुवरा हिमा। यथा यथैषां नैर्मल्यं मधुरत्वं तथा तथा। स्नेहलाघव शैत्यानि रसतत्त्व तथा तथा" भावप्र० गुणाग्रन्थे।

**शर्कराचल** पु० दानार्थं कल्पिते शर्कराकृते पर्वते। तद्विधिः हेमा० दा० पद्मपुराणे उक्तो यथा "अथातः संप्रवक्ष्यामि शर्कराचलमुत्तमम्। यस्य प्रदानाद्विष्णुरुद्रार्कास्तुष्यन्ति सर्वदा। अष्टभिः शर्कराभारैरुत्तमः स्यान्महाचलः। चतुर्भिर्मध्यमः प्रोक्तो भाराभ्यामधरः स्मृतः। भारेण वार्द्धभारेण कुर्याद् यः स्वल्पवित्तवान्। विष्कम्भपर्वतान् कुर्यात् तुरीयांशेन मानवः। धान्यपर्वतवत् सर्वमासाद्यामरसंयुतम्। मेरोरुपरि तद्वच्च स्थाप्य हेमतरुत्रयम्। मन्दारः पारिजातश्च तृतीयः कल्पपादपः। एतद्वृक्षत्रयं मूर्ध्नि सर्वेष्वपि निवेशयेत्। हरिचन्दनसन्तानौ पूर्वपश्चिमभागयोः। निवेश्यौ सर्वशैलेषु विशेषाच्छर्कराचले। मन्दारे कामदेवस्तु प्रत्यग्वक्त्रः सदा भवेत्। गन्धमादनशृङ्गे च धनदः स्यादुदङ्मुखः। प्राङ्मुखो वेदमूर्त्तिस्तु हंसः स्याद्विपुलाचले। हैमी सुपार्श्वे सुरभी दक्षिणाभिमुखी भवेत्। धान्यपर्वतवत् सर्वमावाहनमखादिकम्"।

**शर्कराधेनु** स्त्री दानार्थं कल्पिते शर्कराकृते धेन्वाकारे स्तूपभेदे हेमा०दा० स्कन्दपुराणोक्तविधिर्यथा "तद्वच्च शर्कराधेनुं राजन्! कुर्यात् यथार्थतः। अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे। धेनुः शर्करया राजन्! सदा भारचतुष्टयम्। उत्तमा कथ्यते सद्भिः चतुर्थांशेन वत्सकः। तदर्द्धं मध्यमा प्रोक्ता चतुर्थांशेन कन्यसा। तद्वद्वत्सं प्रकुर्वीत चतुर्थांशेन मानवः। अथ वा धेनुतः कुर्याद्दशांशेन तु वत्सकम्। स्वशक्त्या कारयेद्धेनुं यथात्मानं न पीडयेत्। सर्वबीजानि संस्थाप्य चतुर्दिक्षु समन्ततः। सौवर्णमुखशृङ्गाणि मौक्तिकैर्नयनानि च। गुडेन च मुखं कार्यं जिह्वा पिष्टमयी तथा। कम्बलं पट्टसूत्रेण घण्टाभरणभूषिता। इक्षुपादा रौप्यखुरा नवनीतमयस्तना। प्रशस्तपत्रश्रवणा सितचामरभूषिता। पञ्चरत्नसमायुक्ता दर्भरोमसमन्विता। कांस्योपदोहना सम्यक् गन्धपुष्पैः समन्विता। ईदृक् विधानसंयुक्तां वस्त्रैराच्छादितां तथा। गन्धपुष्पैरलंकृत्य ब्राह्मणाय निवेदयेत्"।

**शर्करार्बुद** पु० रोगभेदे तल्लक्षणं भावप्र० उक्तं यथा "प्राप्य मांसं सिराः स्नायुं मेदः श्लेष्मा तथानिलः। ग्रन्थिं करोत्यसौ भिन्नो मधुसर्पिर्वसानिभम्। स्रवत्यास्रावमत्यर्थं तत्र वृद्धिं गतोऽनिलः। मांसं विशोष्य